# Shri Kinkini Stotram

# શ્રીકિઙ્કિણીસ્તોત્રમ્

## Document Information

Text title : Kinkini Stotram

File name : kinkiNIstotram.itx

Category : devii, durgA, devI

Location : doc_devii

Proofread by : NA

Description/comments : To chant after daily Puja by standing as suggested by Acharya Anand Pathak

Acknowledge-Permission: Courtesy Anand Pathak

Latest update : January 8, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 8, 2021

*sanskritdocuments.org*

# શ્રીકિઙ્કિણીસ્તોત્રમ્

કિં કિં દુઃખં સકલજનનિ ક્ષીયતે ન સ્મૃતાયામ્ ।
કા કા કીર્તિઃ કુલકમલિની પ્રાપ્યતે નાર્ચિતાયામ્ ॥ ૧॥

કિં કિં સૌખ્યં સુરવર નુતે પ્રાપ્યતે ન સ્તુતાયામ્ ।
કં કં યોગન્ત્વયિ ન તનુતે ચિત્તમાલમ્બિતાયામ્ ॥ ૨॥

સ્મૃતા ભવભયધ્વંસિ પૂજિતાસિ શુભઙ્કુરિ ।
સ્તુતા ત્વં વાઞ્છિતાં દેવિ દદાસિ કરુણાકરે ॥ ૩॥

પરમાનન્દબોધાદ્ધિરૂપે તેજસ્વરૂપિણિ -
દેવવૃન્દશિરોરત્ન નિઘૃષ્ટચરણામ્બુજે ।
ચિદ્વિશ્રાન્તિ મહાસત્તા માત્રે માત્રે નમોઽસ્તુ તે ॥ ૪॥

સૃષ્ટિસ્થિત્યુપસંહાર હેતુ ભૂતે સનાતનિ ।
ગુણત્રયાત્મિકાઽસિ ત્વં જગતઃ કારણેચ્છયા ॥ ૫॥

અનુગ્રહાય ભૂતાનાં ગૃહીત દિવ્યવિગ્રહે ।
ભક્તસ્ય મે નિત્યપૂજા યુક્તસ્ય પરમેશ્વરિ ॥ ૬॥

ઐહિકામુષ્મિકીસિદ્ધિં દેહિ ત્રિદશવન્દિતે ।
તાપત્રયપરિમ્લાન ભાજનં ત્રાહિ માં શિવે ॥ ૭॥

નાન્યં વદામિ ન શ◌ૃણોમિ ન ચિન્તયામિ ।
નાન્યં સ્મરામિ ન ભજામિ ન ચાશ્રયામિ ।
ભક્ત્યા ત્વદીયચરણામ્બુજમાદરેણ । (કર્ણોક્તં પાણ્ડવગીતાયામ્)
માં ત્રાહિ દેવિ કૃપયા મયિ દેહિ સિદ્ધિમ્ ॥ ૮॥

અજ્ઞાનાદ્વા પ્રમાદાદ્વા વૈકલ્યાત્ સાધનસ્ય ચ ।
યન્ન્યૂનમતિરિક્તં વા તત્સર્વં ક્ષન્તુમર્હસિ ॥ ૮॥

દ્રવ્યહીનં ક્રિયાહીનં શ્રદ્ધામન્ત્રવિવર્જિતમ્ ।

તત્સર્વં કૃપયા દેવિ ક્ષમસ્વ ત્વં દયાનિધે ॥ ૯॥

યન્મયા ક્રિયતે કર્મ તન્મહત્ સ્વલ્પમેવ વા ।
તત્સર્વં ચ જગદ્ધાત્રિ ક્ષન્તવ્યમયમઞ્જલિઃ ॥ ૧૦॥

॥ ઇતિ શ્રીકિઙ્કિણીસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shri Kinkini Stotram*

pdf was typeset on January 8, 2021

Please send corrections to *sanskrit@cheerful.com*